श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्र्यशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्र्यशीतितमं दशकम् ॥

## पौण्ड्रकवधवर्णनं, काशीपुरिदाहवर्णनं, विविदवधवर्णनं, लक्षणास्वयंवरं च

रामेऽथ गोकुलगते प्रमदाप्रसक्ते
  हूतानुपेतयमुनादमने मदान्धे।
स्वैरं समारमति सेवकवादमूढो
  दूतं न्ययुङ्क्त तव पौण्ड्रकवासुदेवः ॥ 83.1 ॥

नारायणोऽहमवतीर्ण इहास्मि भूमौ
  धत्से किल त्वमपि मामकलक्षणानि।
उत्सृज्य तानि शरणं व्रज मामिति त्वां
  दूतो जगाद सकलैर्हसितः सभायाम् ॥ 83.2 ॥

दूतेऽथ यातवति यादवसैनिकैस्त्वं
  यातो ददर्शिथ वपुः किल पौण्ड्रकीयम्।
तापेन वक्षसि कृताङ्कमनल्पमूल्य -
  श्रीकौस्तुभं मकरकुण्डलपीतचेलम् ॥ 83.3 ॥

कालायसं निजसुदर्शनमस्यतोऽस्य
  कालानलोत्करकिरेण सुदर्शनेन।
शीर्षं चकर्तिथ ममर्दिथ चास्य सेनां
  तन्मित्रकाशिपशिरोऽपि चकर्थ काश्याम् ॥ 83.4 ॥

जाल्येन बालकगिराऽपि किलाहमेव
  श्रीवासुदेव इति रूढमतिश्चिरं सः।

सायुज्यमेव भवदैक्यधिया गतोऽभूत्
    को नाम कस्य सुकृतं कथमित्यवेयात्॥ **83.5** ॥

काशीश्वरस्य तनयोऽथ सुदक्षिणाख्यः
    शर्वं प्रपूज्य भवते विहिताभिचारः।
कृत्यानलं कमपि बाणरणातिभीतै -
    र्भूतैः कथञ्चन वृतैः सममभ्यमुञ्चत्॥ **83.6** ॥

तालप्रमाणचरणामखिलं दहन्तीं
    कृत्यां विलोक्य चकितैः कथितोऽपि पौरैः।
द्यूतोत्सवे किमपि नो चलितो विभो त्वं
    पार्श्वस्थमाशु विससर्जिथ कालचक्रम्॥ **83.7** ॥

अभ्यापतत्यमितधाम्नि भवन्महास्त्रे
    हा हेति विद्रुतवती खलु घोरकृत्या।
रोषात् सुदक्षिणमदक्षिणचेष्टितं तं
    पुप्लोष चक्रमपि काशिपुरीमधाक्षीत्॥ **83.8** ॥

स खलु विविदो रक्षोघाते कृतोपकृतिः पुरा
    तव तु कलया मृत्युं प्राप्तुं तदा खलतां गतः।
नरकसचिवो देशक्लेशं सृजन् नगरान्तिके
    झटिति हलिना युध्यन्नद्धा पपात तलाहतः॥ **83.9** ॥

साम्बं कौरव्यपुत्रीहरण नियमितं सान्त्वनार्थी कुरूणां
    यातस्तद्वाक्यरोषोद्धृतकरिनगरो मोचयामास रामः।
ते घात्याः पाण्डवेयैरिति यदुपृतनां नामुचस्त्वं तदानीं
    तं त्वां दुर्बोधलीलं पवनपुरपते तापशान्त्यै निषेवे॥ **83.10** ॥

॥ इति श्रीमन्नारायणीये त्र्यशीतितमं दशकं समाप्तम्॥